दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

■ पृष्ठ-9 ■ वर्ष-5 ■ अङ्क-345 | 1 | अक्तूबर 04, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ शरद्-ऋतुः
सूर्यः दक्षिणायनम् आश्विन् कृष्णनवमी
आश्विन् 18 प्रविष्टांशः मङ्गलमयः भवेत्

2 एशियाई-क्रीडा-स्पर्धा २०२६: भारतेन पाकिस्तानं पराजित्य एशियाई-क्रीडायां सुवर्णपदकं विजितम्

4 काशा-पाट'-ग्रामे मुख्यमन्त्रिणः सुक्खू- महोदयस्य रात्रिविश्रामः बससेवातः विद्यालयपर्यन्तं बहव्यः महत्यः उद्घोषणाः

8 विधानपरिषदनिर्वाचनात् प्राक् एकीकृत- जनतादले (जदयू-पक्षे) सञ्जाते कलहे शीर्षनेतृत्वस्य दृष्टिः

## सर्वकारः गोपालन-आधारितं-सम्पूर्ण-पारिस्थितक-तन्त्रं विकसयन् अस्ति येन ग्रामीण अर्थव्यवस्थायै प्रोत्साहनं लभते - अमितशाहः



केन्द्रीय गृह एवं सहकारिता मन्त्री अमितशाहः अवदत् यत् नरेन्द्रमोदी प्रशासनं गो-पालनस्य विषये सम्पूर्ण तन्त्रं विकसितुं प्रयतते। गोमयात् जैव गैस-जैविकखाद निर्माणात् प्रारभ्य दुग्धजन्यपदार्थानां प्रसंस्करणं तथा च तेषां विपणस्य व्यवस्था अपि अस्मिन्नेव तन्त्रे अन्तर्भवति। एतेन ग्रामीण अर्थव्यवस्थायाः विकासे नूतनं प्रोत्साहनं प्राप्स्यते। भोपालनगरे आयोजिते राज्यस्तरीय-गौपालक-सम्मेलने भाषमाणः अमितशाहः अवदत् यत् सहकारिता-मन्त्रालयस्य स्थापनया पशुपालकाः सर्वाधिकं लाभं प्राप्स्यन्ति। आपराधिक-न्यायव्यवस्थायाः परिष्कार-विषये अमितशाहः भणितवान् यत् भारतीय-न्याय-संहितायाः पूर्णरूपेण कार्यान्वयने सति प्रथम-सूचना-प्रतिवेदनस्य पञ्जीकरणात् आरभ्य सर्वोच्चन्यायालयपर्यन्तं प्रकरणानां निस्तारणं त्रि-वर्षाभ्यन्तरे कर्तुं शक्यते ।

## दिल्ली-आरक्षिदलेन सूचितं यत् सार्वजनिक-सुरक्षा-विधि-
### व्यवस्थां, यातायात-सञ्चारं सुनिश्चेतुं नवदेहलीमण्डले भारतीय-नागरिक-सुरक्षा-संहिता त्रयोविंशति-उत्तर-द्विसहस्रतमस्य त्रिषष्ट्युत्तरैकशत-तमः भागः प्रभावीभूतः



दिल्ली-आरक्षिदलम् अवदत् यत् जनसुरक्षां, लोकव्यवस्थां, निर्बाधं यातायातसञ्चारं च सुनिश्चितं कर्तुं नवदेहलीमण्डले भारतीय-नागरिक-सुरक्षा-संहितायाः त्रि-षष्ट्यधिकैक-शततमा धारा प्रवर्तते। सार्वजनिकसूचनायां नवदेहल्याः आरक्षि-उपायुक्तः अवदत् यत् अनुमति-विहीनाः जनसम्मर्दाः, सार्वजनिकभाषणानि, उद्घोषकरणं, शोभायात्राः, प्रदर्शनानि, अन्याः निर्दिष्टाः गतिविधयः च निषिद्धाः सन्ति । सूचनायाम् इदम् अपि उक्तं यत् निर्धारिताय कस्मैचिदपि विरोधप्रदर्शनाय अनुमतिः न प्रदत्ता, अपि च तादृशस्य कस्यचित् विरोधप्रदर्शनस्य विषये नवदिल्लीमण्डलस्य आरक्षिदलेन काचित् पूर्वसूचना न प्राप्ता। दिल्ली-आरक्षिदलं नागरिकान् प्रार्थितवत् यत् ते आदेशस्य कठोरतया पालनं कुर्वन्तु, आरक्षिदलेन सह सहयोगं च कुर्वन्तु ।

## सआईआर-विरुद्धं कोलाहलः, जन्तर-मन्तर-अभियानवेलायां १५० प्रदर्शनकारिणः निगृहीताः

मतदातासूच्याः विशेष-गहन-पुनरीक्षणस्य (एसआईआर) निरसनं तथा मुख्यनिर्वाचनायुक्तस्य (सीईसी) ज्ञानेशकुमारस्य त्यागपत्रं च याचितुं शनिवासरे देहल्याः जन्तर-मन्तर-समीपे अखिल-भारतीय-छात्र-सङ्घटनस्य (आइसा) कार्यकर्तृभिः वामपक्षीयसङ्घटनैः च प्रदर्शनं कृतम्। पटेल-चौक-स्थानात् जन्तर-मन्तर-दिशं प्रति अभियानं कुर्वतः प्रदर्शनकारिणः रक्षितृभिः (आरक्षकैः) रोधकानि (बैरिकेड्स) संस्थाप्य स्थगयितुं प्रयासः कृतः। प्रदर्शनकारिणः रक्षकैः स्थापितानि रोधकानि भङ्क्त्वा अग्रे गन्तुं प्रयतन्त। ततः परं रक्षकैः योगेन्द्रयादवेन प्रशान्तभूषणेन च सह १५० प्रदर्शनकारिणः निगृहीताः। एतस्मिन् समये कार्यकर्तारः एसआईआर-विरुद्धं तथा ज्ञानेशकुमारस्य त्यागपत्रस्य समर्थने उच्चैः उद्घोषाणि अकुर्वन्। अस्मिन् अन्तरे रक्षकैः सह प्रदर्शनकारिणां सङ्घर्षः अपि जातः। आइसा-सङ्घटनस्य राष्ट्रियाध्यक्षायाः नेहा-बोरायाः नेतृत्वे वरिष्ठ-अधिवक्तारः कपिल-सिब्बलः, नित्या-रामकृष्णन्, पल्लव-सिसोदिया, प्रशान्त-भूषणः, योगेन्द्र-यादवः च कार्यकर्तृभिः सह पटेल-चौक-स्थाने सम्मिलिताः। इतः जन्तर-मन्तर-दिशं प्रति अभियानम् आरब्धम्।

### सीजेपी-प्रदर्शनोपरि कार्याचरणम्, आयोजकैः सह पञ्चशतं (५००) जनान् विरुद्धं प्राथमिकी (एफआईआर) पञ्जीकृता

मुम्बई। मुम्बय्याः शिवाजी-उद्याने (शिवाजी-पार्के) अक्टोबर्-मासस्य द्वितीये दिनाङ्के सम्पन्ने सीजेपी-प्रदर्शने आयोजकानां विरुद्धं वादः (अभियोगः) पञ्जीकृतः। मुम्बई-आरक्षकदलस्य अनुसारं, शिवाजी-उद्यान-आरक्षकालये सीजेपी-प्रदर्शनस्य आयोजकानां तथा ४००-५०० प्रदर्शनकारिणां विरुद्धं वादः पञ्जीकृतः अस्ति।

## अद्यतनीयं सुभाषितम्

**लोभः सदा विचिन्त्यो लब्धेभ्यः सर्वतो भयं दृष्टम्।**
**कार्यऽकार्यविचारो लोभविमूढस्य नाऽस्त्येव।।**

भावार्थः- मनुष्य में लोभ की प्रवृत्ति का होना सदैव चिन्ता का कारण है और यदि कोई व्यक्ति ऐसा हो तो उसके चारों ओर भय का वातावरण बन जाता है क्योंकि लोभ के वशीभूत होकर ऐसे व्यक्ति की अच्छे और बुरे कार्यों के बीच विचार करने की क्षमता समाप्त हो जाती है।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा




## होर्मुज़-जलसन्धौ तैलवाहके जलयाने स्थिताः पञ्चभारतीयनागरिकाः सुरक्षिततया तटम् आनीताः

ओमान-देशे स्थितः भारतीयदूतावासः होर्मुज़-जलसन्धौ प्रक्षेप्यास्त्रेण आहते कुवैत-ध्वजाङ्किते 'एम. टी. काज़िमा-तृतीय' इति तैलवाहके जलयाने स्थितानां पञ्चानां भारतीयनागरिकाणां रक्षणकार्यस्य समन्वयम् अकरोत्। सामाजिकसंचारमाध्यमे प्रकाशिते सन्देशे दूतावासः अवदत् यत् सर्वे पञ्च भारतीयनागरिकाः सुरक्षिततया तटम् आनीताः। निरन्तरं सहयोगाय साहाय्याय च दूतावासः ओमान-देशस्य अधिकारिभ्यः धन्यवादान् अर्पितवान्। विदेशमन्त्रालयः अवदत् यत् विदेशेषु स्थितानां भारतीयनाविकानां सुरक्षायै, संरक्षणाय, कल्याणाय च दूतावासः प्रतिबद्धः अस्ति।

# गतदिवसे एशियाई-क्रीडायां भारतेन पञ्च-स्वर्णपदकानि, द्वे रजतपदके च विजिते


MEDAL STANDINGS

| Rank | ORG | Gold | Silver | Bronze | Total |
|---|---|---|---|---|---|
| 1 | CHN People's Republic of China | 157 | 75 | 65 | 297 |
| 2 | JPN Japan | 63 | 80 | 80 | 223 |
| 3 | KOR Republic of Korea | 31 | 33 | 54 | 118 |
| 4 | UZB Uzbekistan | 17 | 21 | 20 | 58 |
| 5 | THA Thailand | 14 | 11 | 15 | 40 |
| 6 | IND India | 12 | 24 | 34 | 70 |

जापानदेशे प्रचल्यमानेषु एशियाई-क्रीडासु भारतं पञ्च स्वर्णपदकानि, द्वे रजतपदके, द्वे कांस्यपदके च जितवत्। भारतीयं पुरुषाणां हॉकी-दलं मलेशियादेशं पराजित्य देशस्य कृते स्वर्णपदकं प्राप्तवत्। भारतीयं पुरुषाणां क्रिकेट-दलं पाकिस्तानं पराजित्य स्वर्णपदकं जितवत्। मल्लयुद्धे पुरुषाणां सप्तपञ्चाशत्-किलोग्राम्-भारवर्गे अमन सहरावत स्वर्णपदकं, सप्तनवति-किलोग्राम्-भारवर्गे दीपक पुनिया च कांस्यपदकं जितवान्। अन्तिम पंघाल महिलानां त्रिपञ्चाशत्-किलोग्राम भारवर्गे रजतपदकं प्राप्तवती। अपि च, गोल्फ-क्रीडायां प्रणवी शरत अर्स महिलानां वैयक्तिकस्पर्धायां स्वर्णपदकं, दलस्पर्धायां च रजतपदकं प्राप्तवती । महिलानां रिकर्व-धनुर्विद्यायां कुमकुम मोहोड स्वर्णपदकं जितवती, नीरज चौहान च पुरुषाणां रिकर्व-स्पर्धायां कांस्यपदकं प्राप्तवान्। पदकतालिकायां भारतम् एकविंशतिः स्वर्णपदकानि, सप्तविंशतिः रजतपदकानि, सप्तत्रिंशत् कांस्यपदकानि च इति आहत्य पञ्चाशीति-पदकैः सह चतुर्थे स्थाने वर्तते। राष्ट्रपतिः द्रौपदी मुर्मू महोदया, प्रधानमन्त्री नरेन्द्रमोदी महोदयः, क्रीडामन्त्री मनसुख माण्डविया महोदयः च पदकविजेतॄन् अभिनन्दितवन्तः।

# आन्ध्रप्रदेशे सत्यावेडु-मण्डलस्य 'श्रीसिटी' इत्यत्र एकेन औद्योगिक -वाष्पयन्त्र-विस्फोटेन चत्वारः कर्मकराः मृताः, एकश्च गम्भीररूपेण व्रणितः



आन्ध्रप्रदेशे सत्यावेडुमण्डलस्य श्रीसिटी-क्षेत्रे एकस्मिन् निज-औद्योगिककेन्द्रे वाष्पयन्त्रस्य विस्फोटे चत्वारः श्रमिकाः मृताः, अन्यः एकः च गभीररूपेण आहतः। अयं विस्फोटः विशेषार्थिक-क्षेत्रे स्थितस्य एकस्य उद्योगशालान्तरगतः अभवत्। द्वौ श्रमिकौ घटनास्थले एव मृतौ, अन्ये त्रयः च गभीररूपेण आहताः समीपस्थे चिकित्सालयं नीताः। आहतेषु द्वौ श्रमिकौ पश्चात् चिकित्साकाले मृतौ। अवशिष्टस्य श्रमिकस्य चिकित्सा गहनचिकित्साकक्षे प्रचलति। मुख्यमन्त्री एन. चन्द्रबाबू नायडू महोदयः अस्यां घटनायां अतिशय-दुखं प्रकटितवान्। सः वरिष्ठाधिकारिभिः सह सम्भाष्य तान् आवश्यकान् उपायान् कर्तुं शोकसन्तप्तेभ्यः परिवारेभ्यः सर्वविधं सम्भाव्यं साहाय्यं प्रदातुं च निर्दिष्टवान्।

# प्रधानमन्त्रिणः नरेन्द्रमोदिनः मासिकः आकाशवाणी-कार्यक्रमः 'मन-की-बात' द्वादश-वर्षाणि पूरितानि




प्रधानमन्त्रिणः नरेन्द्रमोदिनः मासिक-आकाशवाणी-कार्यक्रमः 'मन-की-बात' इति कार्यक्रमः द्वादशवर्षाणि प्रपूरितवान्। अस्य कार्यक्रमस्य प्रथमं प्रसारणं चतुर्दशोत्तर-द्विसहस्रतमे वर्षे विजयदशम्याः अवसरे प्रसारितः अभवत्। साम्प्रतं यावत् मन-की-बात कार्यक्रमस्य अष्टत्रिंशदुत्तरैकशत- संस्करणानि प्रसारितानि। विगतेषु द्वादश-वर्षेषु "मन-की-बात" कार्यक्रम-माध्यमेन समग्रदेशे जायमानं सकारात्मकं परिवर्तनं प्रकाशयितुं, भारतस्य विकास-यात्रायां भारतीय-नागरिकाणां सक्रियांश-ग्रहणं प्रोत्साहयितुं च एकं विशिष्टं मञ्चं प्रदत्तवान्। अनेन मासिक-कार्यक्रमेण प्रधानमन्त्री देशस्य तेषां जनानां प्रेरणादायीः कथाः विनिमयं करोति, ये शिक्षा-स्वास्थ्य-पर्यावरणसंरक्षण-नवाचार-समाजसेवादिषु क्षेत्रेषु विशिष्टं योगदानं कुर्वन्ति।

# एशियाई-क्रीडा-स्पर्धा २०२६: भारतेन पुरुष-हॉकी-स्पर्धायाः सुवर्णपदकम् ओलम्पिक-प्रवेशपत्रं च विजितम्

आइची-नागोया। भारतेन मलेशिया-देशं ५-१ इत्यनेन अन्तरङ्गेण पराजित्य एशियाई-क्रीडायाः पुरुष-हॉकी-स्पर्धायाः सुवर्णपदकं विजितम्, एतेन सहैव लॉस-एञ्जेलिस-ओलम्पिक-२०२८ इत्यस्य कृते प्रवेशपत्रम् (स्थानम्) अपि प्राप्तम्।अनेन विजयेन सह एशियाई-क्रीडायां भारतेन पुरुष-महिला-हॉकी-क्रीडयोः प्रथमतया 'द्विगुण-सुवर्णपदकस्य' (डबल् गोल्ड्) ऐतिहासिकं कार्यं पूर्णं कृतम्। कबड्डी-क्रिकेट-क्रीडयोः अनन्तरं केवलं तृतीयवारम् एतत् जातं यत् कयाचित् भारतीय-दल-क्रीडया 'द्विगुण-सुवर्णपदकं' विजितम्। भारतेन एशियाई-क्रीडासु हॉकी-स्पर्धायाः स्वकीयं पञ्चमं सुवर्णपदकं विजितम्, तथा च प्रथमतया भारतेन पुरुष-विभागे लगातार द्विवारं विजयोपाधिः प्राप्ता। अनेन सुवर्णपदकेन सह भारतेन २०२८ ओलम्पिक-क्रीडायाः स्थानमपि (कोटा) सुनिश्चितं कृतम्। भारताय हरमनप्रीत-सिंहेन द्वौ गोलौ कृतौ, जुगराज-सिंहः, हार्दिक-सिंहः, शिलानन्द-लाकड़ा च प्रत्येकमपि भारतस्य कृते गोलान् अकुर्वन्मलेशिया-दलस्य कृते एकमात्रं गोलं शेल्लो-सिल्वेरियस-नामकः क्रीडकः अकरोत्।

# एशियाई-क्रीडा-स्पर्धा २०२६: भारतेन पाकिस्तानं पराजित्य एशियाई-क्रीडायां सुवर्णपदकं विजितम्



भारतेन एशियाई-क्रीडा-स्पर्धायां सातत्येन द्वितीयं सुवर्णपदकं प्राप्तम्। अभिषेकशर्मणः (६१), तिलकवर्मणः (अविजित-५१) तथा शिवम-दुबे-महोदयस्य (२७ धावनाङ्काः / कन्दुकद्वयं गृहीतम्) उत्कृष्टप्रदर्शनस्य बलेन भारतेन शनिवासरे एशियाई-क्रीडा २०२६ इत्यस्याः क्रिकेट-स्पर्धायाः अन्तिम-चक्रे (फाइनल्-मध्ये) चिरप्रतिद्वन्द्विनं नवदश (१९) धावनाङ्कैः पराजित्य विजयोपाधिः स्वनाम्ना कृता। द्विशताधिक-एकादश (२१२) धावनाङ्कानां लक्ष्यम् अनुधावन्त्याः पाकिस्तान-दलस्य कृते नायकः साहिबज़ादा-फरहानः माज-सदाकतश्च इति प्रारम्भिक-युगलेन प्रथम-विकेट्-कृते त्रयस्त्रिंशत् (३३) धावनाङ्काः योजिताः। चतुर्थे चक्रे वॉशिङ्गटन्-सुन्दरेण साहिबज़ादा-फरहानः (१०) निष्कासितः, येन भारतं प्रथमं साफल्यम् अलभत। तदनन्तरमेव अग्रिमे चक्रे अक्षर-पटेलः उस्मान-खानं (त्रयः धावनाङ्काः) निष्कासितवान्।सप्तमे चक्रे माज-सदाकतस्य (२३) रूपेण पाकिस्तानस्य तृतीयः विकेट् अपतत्। ततः परं हसन-नवाजस्य सैम-अयूबस्य च युग्मेन पाकिस्तानस्य क्रीडा सम्भाविता। द्वाभ्यां क्रीडकाभ्यां चतुर्थ-विकेट्-कृते सप्ताशीतिः (८७) धावनाङ्काः संयोज्य दलं स्पर्धायै पुनः प्रत्यावर्तितम्। पञ्चदशे चक्रे शिवम-दुबे-महोदयेन सैम-अयूबः (२९) बहिष्कृतः, येन एषा साझेदारी समाप्ता। अष्टादशे चक्रे वॉशिङ्गटन्-सुन्दरेण अब्दुल-समदः (नव धावनाङ्काः) निष्कासितः, यत् पाकिस्तानस्य पञ्चमम् आघातम् आसीत्।अस्मिन् अन्तराले हसन-नवाजः एकां दिशं दृढीकृत्य वेगेन धावनाङ्कान् अरचयत्। अन्तिम-कन्दुके शिवम-दुबे-महोदयेन सः कन्दुक-रक्षकस्य संजू-सैमसनस्य हस्ते ग्रहणं (कैच्) कारयित्वा निष्कासितः। सः ५१ कन्दुकेषु पञ्च चतुष्कानां सप्त षट्कानां च साहाय्येन षण्णवति (९६) धावनाङ्कानां क्रीडाम् अकरोत्।पाकिस्तान-दलं निर्धारितेषु विंशति-चक्रेषु षड्-विकेट्-व्ययेन केवलं द्विनवत्यधिक-शतम् (१९२) धावनाङ्कान् एव प्राप्तुम् अशक्नोत्, स्पर्धां च नवदश (१९) धावनाङ्कैः अपराजितम् अभवत्। भारतस्य कृते शिवम-दुबे, वॉशिङ्गटन्-सुन्दरः, अक्षर-पटेलश्च द्वौ द्वौ विकेट् प्राप्तवन्तः।

# मुख्यमंत्रिणः सुक्खू महोदयस्य घोषणाः षण्मासेषु चतुर्सहस्रशिक्षकाः नियुक्ताः भविष्यन्ति, आउटसोर्स-कर्मचारिणां कृते नीतिः शीघ्रमेव



हिमसंस्कृतवार्ताः- शिमला। मुख्यमंत्री सुखविन्द्रसिंहसुक्खू शनिवारे शिमलामण्डलस्य रामपुर- विधानसभाक्षेत्रस्य नोगलीस्थाने आयोजिते विशालजनसभां सम्बोधयन् अवदत् यत् प्रदेशसर्वकारः शिक्षायाः, स्वास्थ्यस्य, ग्रामीणाध्र्यव्यवस्थायाः च सुदृढीकरणाय निरन्तरं कार्यं कुर्वन् अस्ति। सः अवदत् यत् वर्तमानसर्वकारस्य कार्याकाले अधुना यावत् दशसहस्राधिकाः शिक्षकाः नियुक्ताः, आगमिनि षण्मासे चत्वारि सहस्राणि नवीनाः शिक्षकाः नियुक्ताः भविष्यन्ति। सः अवदत् यत् गुणात्मकशिक्षायाः वर्धनाय प्रदेशे १५० तः अधिकाः सीबीएसई-विद्यालयाः आरब्धाः। एतेषु विद्यालयाषु लगभग द्विसहस्रशिक्षकाणां नियुक्तिः कृता अस्ति।

### चिकित्सालयेषु १९ वर्ष पुरातनानि यन्त्राणि क्रमेण परिवर्तन्ते- सुक्खू

सः अवदत् यत् २०२१ तमे वर्षे पूर्व- भाजपा-सर्वकारस्य काले गुणात्मकशिक्षाक्षेत्रे हिमाचलप्रदेशः एकाविंशतितमे (२१) स्थाने आसीत्, परन्तु वर्तमानसर्वकारस्य प्रयत्नैः प्रदेशः अधुना पञ्चमे स्थाने आगतः। प्रदेशस्य सर्वे चिकित्सा- महाविद्यालयाः अटल- मेडिकल- सुपर- स्पेशियलिटी- संस्थानं चमियाना च आधुनिकतन्त्रेण सज्जीक्रियन्ते।

### करुणामूलकाधारे ७० प्रतिशत- विषयाणां समाधानं कृतम्

मुख्यमन्त्री अवदत् यत् प्रदेशस्य सर्वेभ्यः शासकीय- कर्मचारिभ्यः पुरातनपेन्शनयोजनायाः लाभः प्रदत्तार्थः, कांग्रेससर्वकारस्य स्थितेः समये सा कदापि न स्थगिता भविष्यति। आउटसोर्स- कर्मचारिणां हितानां रक्षायै राज्यसर्वकारः एकां नीतिं निर्मातुम् कार्यं कुर्वन् अस्ति, या आगामीसमये प्रयोक्ष्यते। पूर्व-भाजपासर्वकारतः ७६ सहस्रकोटि- रूप्यकाणाम् ऋणं १० सहस्रकोटिरूप्यकाणां दायित्त्वानि च प्राप्तानि- मुख्यमन्त्री सुक्खू आरोपम् अकरोत् यत् वर्तमानसर्वकारः पूर्व- भाजपा- सर्वकारतः ७६ सहस्रकोटिरूप्यकाणाम् ऋणं कर्मचारिसम्बन्धीनि लगभग १० सहस्रकोटिरूप्यकाणां दायित्त्वानि च उत्तराधिकाररूपेण प्राप्नोत्। सः अवदत् यत् ग्रामीणअर्थव्यवस्थायाः सुदृढीकरणं प्रदेश- सर्वकारस्य प्राथमिका अस्ति। किशाऊ- परियोजनातः १,५०० कोटिरूप्यकाणां आयस्य प्रत्याशा किशाऊ- बहुउद्देशीय- परियोजनायां हिमाचलप्रदेशस्य हितानुरूपम् अनुबन्धः कारितः, येन विद्युदुत्पादनाय त्रिचतुःसहस्रकोटीरूप्यकाणां संभाव्यव्ययस्य अपकर्षः अभवत्। परियोजनायाः निर्माणानन्तरं प्रदेशकोषागारं प्रतिवर्षं प्रायः १,५०० कोटिरूप्यकाणाम् आयस्य सम्भावना अस्ति।

अस्मिन्नेव मासे प्रयोक्ष्यते 'अपना परिवार, सुखी परिवार' योजना- मुख्यमन्त्री मुख्यमन्त्री अवदत् यत् राज्यसर्वकारः अस्मिन्नेव मासे 'अपना परिवार, सुखी परिवार' योजनाम् प्रारभते। योजनायाः अन्तर्गतं पात्रमहिलाभ्यः १५०० रूप्यकाणि प्रतिमासम् आर्थिकसहायता, पात्रकुटुम्बेभ्यः ३०० युनिटपर्यन्तं निःशुल्कविद्युतः प्रदास्यते।

## हिमाचलप्रदेशे धाविष्यति प्रथमम् 'उद्यान- एकपथीय- यानम् ३०० मीटर- परिमितस्य मार्गस्य निर्माणं सम्पन्नम्



### प्रथमे चरणे एक-किलोमीटर- परिमितः मार्गः भविष्यति सज्जः

हिमसंस्कृतवार्ताः- सुन्दरनगरं (मण्डी)। औद्यानिकीक्षेत्रे परिवहनव्यवस्थां नवीकर्तुं सुन्दरनगरस्य 'पलौहटा-२' संकुले राज्यस्य प्रथमा औद्यानिकी- एकपथीया- परियोजना प्रारप्स्यते। 'एचपी- शिवा- परियोजनायाः अन्तर्गतम् 'एशियाई- विकास- वित्तकोषस्य' सहयोगेन अयं प्रायोगिक- उपक्रमः धरातले अवतार्यते। संकुलसमित्या उद्यानविभागेन च अस्याः एकपथीयायाः प्रायः ३०० मीटरपरिमितस्य मार्गस्य निर्माणं सम्पूर्य तस्य सफलं परीक्षणम् अपि कृतम्।

**प्रथमे चरणे एक-किलोमीटर-परिमितः मार्गः**

शनिवासरे सुन्दरनगर- उद्यान- विभागस्य दलेन उद्यानविकास-अधिकारिणः अनुपमामेहरा- महोदयायाः नेतृत्वे कार्यस्थलस्य निरीक्षणं विहितम्। परियोजनायाः प्रारम्भे प्रायः एक- किलोमीटर- दीर्घः एकपथीय-मार्गः सज्जीक्रियते। अनेन उद्यानपालकेभ्यः कृषि-उपकरणानां, बीजानां, खाद-सामग्रीणां सहैव वाटिकाभ्यः पक्वानां फलानां वहने महती सुगमता सम्पत्स्यते। उल्लेखनीयं यत् 'एचपी-शिवा' परियोजनायाः, 'आईआईटी मण्डी' इत्यस्याः तान्त्रिकदलेन च कृतेन प्राविधिक-समीक्षणेन अनन्तरम् अस्य कार्यम् आरब्धम्। 'एडीबी'-संस्थायाः दलेन अपि पलौहटा-संकुलं गत्वा अस्याः परियोजनायाः सम्भावनानाम् अन्वेषणं कृतम् आसीत्।

### २१.५ हेक्टर-विस्तीर्णं संकुलम्, विपणौ फलानां प्रापणे सौविध्यम्

पलौहटा-२ संकुलं प्रायः २१.५ हेक्टयर-परिमिते क्षेत्रे विस्तृतं वर्तते। यदि अत्र एकपथीयायाः प्रयोगः सफलः भविष्यति, तर्हि प्रदेशे सर्वकारीयस्तरे स्थापिता इयं प्रथमा औद्यानिकी- एकपथीया- परियोजना भविष्यति।

पर्वतीय-उद्यानक्षेत्रेषु परिवहनसाधनानाम् अभावात् कृषकाः उद्यान-पालकाश्च स्व-फलोत्पादान् विपणिं प्रति प्रापयितुं काठिन्यम् अनुभवन्ति स्म। एतादृश्यां स्थितौ फलानाम् औद्यानिकी-सामग्रीणां च वहनाय इयं मोनो-रेलयानम् एका सुलभा व्यवस्था भविष्यति। एनं नवोन्मेषं वीक्ष्य स्थानिकाः फल-उत्पादकाः अतीव प्रसन्नाः सन्ति।

'पलौहटा-२ फल-उत्पादक एवं विपणन-सङ्घस्य' अध्यक्षेण मुनीश-शर्मा-महोदयेन विज्ञापितं यत् कार्यं द्रुत-गत्या प्रचलति, अचिरादेव एषा व्यवस्था फलानां वहने सार्थिका सिध्यति। राज्यस्य औद्यानिकीमन्त्री जगतसिंहनेगीमहोदयः अपि एनां परियोजनां प्राथमिकता-सूचौ स्थापितवान्।



## एकादश-प्रतिशतं (११%) न्यून-वृष्ट्या सह प्रस्थितः वर्षर्तुः; 'पश्चिमी- विक्षोभस्य' प्रभावेन आगामिषु चतुर्षु दिनेषु वृष्टि-हिमपातयोः सम्भावना

हिमसंस्कृतवार्ताः- शिमला। दक्षिण-पश्चिमवर्षर्तुः शनिवासरे समग्र- हिमाचलप्रदेशात् प्रतिनिवृत्तः। यद्यपि वर्षर्तोः प्रत्यागमनस्य सामान्या तिथिः २५ सितम्बर आसीत्, अस्मिन् वर्षे च वर्षर्तुः सामान्य-तिथितः सप्तदिनानि विलम्बेन आगतवान् आसीत्। अस्मिन् सत्रे राज्ये ६५२.३ मिलिमीटर-परिमितं वास्तविकं वर्षणं जातम्, यत्र सामान्य-वृष्टेः मानदण्डः ७३४.४ मिलिमीटर-परिमितः निर्धारितः आसीत्। अनेन प्रकारेण अस्मिन् ऋतौ सामान्यतः एकादश- प्रतिशतं (११%) न्यूना वृष्टिः अभवत्। अपरत्र वर्षर्तोः निर्गमनानन्तरं 'पश्चिमी-विक्षोभस्य' प्रभावेण राज्ये ऋतुपरिवर्तनं सम्भाव्यते। ऋतुविज्ञानकेन्द्रस्य पूर्वानुमानानुसारं प्रदेशे निरन्तरं दिनचतुष्टयं (४ दिनानि) यावत् वृष्टेः उच्च-शिखरेषु च हिमपातस्य सम्भावना वर्तते।

# काशा-पाट'-ग्रामे मुख्यमन्त्रिणः सुक्खू- महोदयस्य रात्रिविश्रामः बससेवातः विद्यालयपर्यन्तं बह्व्यः महत्यः उद्घोषणाः



**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशस्य मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः शिमलामण्डलस्य रोहड़ू- विधानसभा-क्षेत्रान्तर्गते भटवाड़ी-ग्रामे 'सर्वकारः ग्रामस्य द्वारे' कार्यक्रमे सम्भागं गृहीत्वा रामपुर- विधानसभा-क्षेत्रस्य अतिदुर्गमं ग्रामं 'काशा-पाट' सम्प्राप्तः। मुख्यमन्त्रिणा अस्मिन् दुर्गमे ग्रामे रात्रि-प्रवासः कृतः, पाट-निवासी सुपनदासमहोदयस्य गृहे च रात्रिविश्रामः विहितः।

काशा-पाटग्रामं प्राप्ते मुख्यमन्त्रिणि स्थानिकाः ग्रामीणाः पारम्परिक-वाद्य-यन्त्राणां मधुर-ध्वनिभिः सह तस्य भावपूर्णं स्वागतम् अकुर्वन्। ग्रामवासिनः तस्मै पारम्परिक-वेषभूषां समर्प्य तस्य अभिनन्दनं कृतवन्तः। रात्रौ विलम्ब-पर्यन्तं ग्रामीणैः मनोहराः सांस्कृतिकाः कार्यक्रमाः प्रदर्शिताः, येषाम् आनन्दं मुख्यमन्त्री स्वयं स्वीकृतवान्, पारम्परिके 'नाटी' नृत्यसमारोहे अपि सम्मिलितः अभवत्।

### ग्रामीण-क्षेत्राणां विकासाय सर्वकारस्य सङ्कल्पः; विद्यालयाय द्वि-कोटि-रूप्यकाणि

अस्मिन् अवसरे मुख्यमन्त्रिणा प्रोक्तं यत् सः स्वयं ग्रामीण-परिवेशात् सम्बद्धः अस्ति। यावत् ग्रामेषु आर्थिकसमृद्धिः नागमिष्यति, तावत् प्रदेशः यथार्थरूपेण समृद्धः भवितुं न शक्नोति। काशापाट सदृशे दुर्गमे क्षेत्रे मुख्यमन्त्रिरूपेण आगमनं सः स्वकीयम् अहोभाग्यम् अमन्यत।

मुख्यमन्त्रिणा काशा-पाटग्रामे नूतन-विद्यालय-भवनस्य निर्माणाय द्वि-कोटि-रूप्यकाणां सद्यः घोषणा कृता। सहैव ग्रामे क्रीडाङ्गणस्य विकासाय घोषणां विधातुं स्थानिकानां सर्वासां याचनानां पूरणस्य आश्वासनं दत्तवान्। सः अवदत् यत् कोऽपि बालकः शिक्षया वञ्चितः न भवेत्, अत एव सर्वकारेण काशापाटतः तकलेचमार्गेण रामपुरपर्यन्तं बस-यानसञ्चालनस्य प्रयासः क्रियते।

# बस-क्रयणे ४०% अनुदानं प्रतिमासं च ५० सहस्र-रूप्यकाणां साहाय्यम्

मुख्यमन्त्रिणा उद्घोषितं यत् यदि ग्रामस्य कोऽपि जनः अधिकतमं त्रिंशत्-लक्ष-रूप्यकाणां व्ययेन बसयानं क्रीत्वा इमां सेवां प्रारप्स्यते, तर्हि राज्य-सर्वकारेण तस्मै चत्वारिंशत्-प्रतिशतं (४०%) आर्थिकसाहाय्यं दास्यते। रोहड़ूक्षेत्राय अपि इयमेव व्यवस्था भविष्यति। एतदतिरिक्तं बस-स्वामिने पञ्चवर्षाणि यावत् प्रतिमासं पञ्चाशत्- सहस्र-रूप्यकाणां (५०,०००) आर्थिकसाहाय्यं वितरिष्यते। सः अवदत् यत् राज्यस्य ६८ प्रतिशतं भूभागं वनक्षेत्रे अन्तर्भवति, अतः मार्गनिर्माणे वनविभागस्य अनुमत्यादि-बाधाः सम्मुखीकर्तव्याः भवन्ति। तथापि सर्वकारः दुर्गमक्षेत्राणि मार्गैः योजयितुं प्रतिश्रुतः अस्ति।

## महिलामण्डलेभ्यः आर्थिकसाहाय्यम्, सौर ऊर्जायाः प्रोत्साहनं च मुख्यमन्त्रिणा घोषितानि अन्यानि प्रमुखाणि आश्वासनानि:

> येषां महिला-मण्डलानां स्वकीय-भवनानि न सन्ति, तेभ्यः भवन-निर्माणाय पञ्च- पञ्च- लक्ष-रूप्यकाणि (५-५ लक्ष) प्रदास्यन्ते; विद्यमान-भवनेभ्यश्च सामग्री-क्रयणार्थम् एक-लक्ष-रूप्यकाणां साहाय्यं लप्स्यते।

> 'स्व-परिवारः सुखी-परिवारः' योजना शीघ्रमेव प्रारप्स्यते, यस्याम् अर्हाभ्यः महिलाभ्यः प्रतिमासं १५०० रूप्यकाणां वृत्तिः दीयते।

> सौर-ऊर्जा-परियोजनानां स्थापनाय चतुष्प्रतिशतं (४%) ब्याज-अनुदानं (जनजातीय-क्षेत्रेषु ५%) विहितम्। सांस्कृतिक-कार्यक्रमेषु सम्भागेभ्यः बालिकाभ्यः उत्साहवर्धनाय एक-लक्ष-रूप्यकाणि प्रदत्तानि। कार्यक्रमे मुख्यमन्त्रिणा काशा-पाटक्षेत्रे 'गृहप्रवास' पञ्जीकरण-कर्तृभ्यः चतुर्भ्यः (४) जनेभ्यः प्रमाणपत्राणि समर्पितानि। सः अवदत् यत् गृहप्रवासेन दुर्गमक्षेत्रेषु पर्यटनं प्रवर्धिष्यते स्थानिकानां च आय-साधनानि विकसितानि भविष्यन्ति। सहैव विश्व-पर्यटन-सप्ताह-निमित्ते आयोजितायाः चित्रकला-प्रतियोगितायाः विजेतृभ्यः पुरस्कारराशयः अपि वितरिताः।

# जेपी-नड्डा ५ अक्टूबर् दिनाङ्के बिलापुरं प्राप्स्यति; ६ अक्टूबर दिनाङ्के 'एम्स'-संस्थानस्य दीक्षान्त-समारोहे सम्भागी भविष्यति



**हिमसंस्कृतवार्ताः- बिलासपुरम्।** भारतसर्वकारस्य केन्द्रीय- स्वास्थ्य- परिवार- कल्याण- रसायन-उर्वरकमन्त्री जगतप्रकाश- नड्डामहोदयः ५ अक्टूबर दिनाङ्के बिलासपुरं प्राप्स्यति। सः ६ अक्टूबर् दिनाङ्के 'अखिल- भारतीय- आयुर्विज्ञानसंस्थानम्' इत्यस्य प्रथमे दीक्षान्तसमारोहे मुख्यतया सम्भागी भविष्यति।केन्द्रीय-मन्त्रिणः प्रवास-कार्यक्रमानुसारं सः ५ अक्टूबर दिनाङ्के देहलीतः चण्डीगढमार्गेण बिलासपुरं प्राप्य 'विजयपुर' स्थले रात्रिविश्रामं करिष्यति। प्रदेश-भाजपा- सहप्रभारिणा स्वदेशठाकुरेण विज्ञापितं यत् नड्डा-महोदयः ५ अक्टूबर दिनाङ्के सायं ४:२० वादने देहल्याः इन्दिरा-गान्धी- अन्ताराष्ट्रिय- विमानपत्तनं प्राप्स्यति। ततः सायं ५:०० वादने 'एयर-इण्डिया'- विमानेन चण्डीगढं प्रति प्रस्थास्यति। सायं षड्वादने (६:००) चण्डीगढं सम्प्राप्य सः स्थलमार्गेण बिलासपुरस्य विजयपुरं प्रति गमिष्यति। रात्रौ नववादने विजयपुरं प्राप्य तत्रैव वासं करिष्यति। तदनन्तरं ६ अक्टूबर दिनाङ्के प्रातः ९:४० वादने विजयपुरतः स्थलमार्गेण एम्स-बिलासपुरं प्रति प्रस्थास्यति, प्रातः १०:२५ वादने एम्स-परिसरं प्राप्स्यति। ततः प्रातः १०:३५ वादन-तः अपराह्ने एकवादनं (१:००) यावत् एम्स-बिलासपुर-संस्थानस्य प्रथमे दीक्षान्तसमारोहे उपस्थितः स्थास्यति।

## ६ अक्टूबर दिनाङ्के एम्स-संस्थाने ओपीडीसेवाः स्थगिताः

अपरत्र एम्स-बिलासपुर-संस्थाने ६ अक्टूबर दिनाङ्के बाह्य-रोगी-विभागस्य सेवाः पूर्णतया स्थगिताः भविष्यन्ति। संस्थानस्य प्रथमे दीक्षान्त-समारोहे सुरक्षार्थं व्यवस्था-सौकर्याय च अयं निर्णयः कृतः। अस्मिन् दिने ओपीडी-विभागे रुग्णानां पञ्जीकरणं चिकित्सकीय-परामर्शश्च समुपलब्धौ न भविष्यतः। एम्स-संस्थानस्य कुलसचिवेन राकेशकुमार-सिंहेन जनसामान्यं रोगिणश्च प्रार्थिताः यत् ६ अक्टूबर दिनाङ्के नियमित-परीक्षणाय वा परामर्शाय वा एम्स-आगमनस्य योजना न निर्मातव्या। असुविधा-निवारणाय ते अन्यस्मिन् कस्मिंश्चित् दिने आगन्तुं शक्नुवन्ति। तथापि ओपीडी- पिधानानन्तरम् अपि एम्ससंस्थानस्य आपत्कालीनसेवाः सामान्यदिनवत् निरन्तरं प्रवर्तिष्यन्ते।

## दीर्घ-विराम-दिनेषु पर्यटकानां महान् सम्मर्दः, कुल्लू-मण्डले एचआरटीसी-बसयानं विपर्यस्तं षड् जनाः आहताः

**हिमसंस्कृतवार्ताः- कुल्लू/शिमला।** हिमाचलप्रदेशे दीर्घ-विश्राम-काले पर्यटन-व्यापारः द्रुतगतिम् अधारयत्। प्रदेशे विपुलायाः पर्यटक- सङ्ख्यायाः आगमनेन विविधस्थानेषु मार्गसञ्चारः भृशम् अवरुद्धः अभवत्, वाहनानां च दीर्घाः पङ्क्तयः सञ्जाताः। अपरत्र, मनालीतः पठानकोटनगरं प्रति गच्छत् हिमाचल-पथ-परिवहन-निगमस्य एकं बसयानं शनिवासरे प्रातःकाले कुल्लू-मण्डलस्य 'बाशिंग' स्थले मार्गे विपर्यस्तम्। अस्मिन् मार्गे जातायां दुर्घटनायां षड् (६) यात्रिकाः आहताः सञ्जाताः, येभ्यः सद्यः औषधोपचारार्थं चिकित्सालयं प्रेषितम्।

# लोकतन्त्रे प्रजा एव स्वामिनी, कार्यं यः करिष्यति स एव विजेष्यते- मुख्यमन्त्री सम्राटचौधरी



## ❑ नरेन्द्रमोदिनः पञ्चविंशतिवर्षाणां विकासाभियानं स्मरन् मुख्यमन्त्री- "सुशासनेन बिहारस्य पुनर्प्रतिष्ठाप्यते गौरवम्"

**हिमसंस्कृतवार्ताः- राघव नाथ झा, पटना**

बिहारस्य मुख्यमन्त्रिणा सम्राटचौधरी-महोदयेन अद्य पाटलिपुत्रस्थे ऊर्जाप्रेक्षागृहे कला- संस्कृति- विभागेन 'सेवा- सङ्कल्प- अभियानान्तर्गतम् आयोजिते 'सेवा-स्मरण' कार्यक्रमे दीपं प्रज्वाल्य विधिवत् उद्घाटनं कृतम्। अस्मिन् अवसरे भारतस्य यशस्विनः प्रधानमन्त्रिणः नरेन्द्रमोदिनः विगतानां पञ्चविंशतिवर्षाणां लोककल्याणकारि-कार्याणि, देशे सञ्जातं युगान्तकारी-परिवर्तनं विकासयात्रां चाधिकृत्य एकस्य भव्यस्य सङ्गीतमय-नाट्यस्य सफलं मञ्चनं विहितम्। तत्पूर्वं मुख्यमन्त्रिणा राष्ट्रपितुः महात्मागान्धिनः, भूतपूर्व- प्रधानमन्त्रिणः भारतरत्न- लालबहादुरशास्त्रिणोः पावनजयन्ती-अवसरे तयोः प्रतिकृतौ पुष्पाञ्जलिं समर्प्य भावभीनं स्मरणं कृतम्।

समारोहं सम्बोधयन् मुख्यमन्त्रिणा प्रतिपादितं यत् विगतेषु पञ्चविंशतिवर्षेषु भारते सर्वसमावेशी विकासः परिलक्षितः, यः देशस्य नूतन- आत्मविश्वासस्य प्रतीकोऽस्ति। प्रधानमन्त्रिणः आदरणीयस्य नरेन्द्रमोदिनः दूरदर्शी-नेतृत्वे निर्धनानां, शोषितानां वञ्चितानां च समुत्थानाय ऐतिहासिक-निर्णयाः स्वीकृताः। तस्यैव नीत्या देशे प्रायः पञ्चकोटि-मितानि नूतनगृहाणि निर्मितानि, 'उज्ज्वला- योजनामाध्यमेन निर्धनगृहिणीनां पाकशालासु धूममुक्तिः प्रदत्ता। बृहत्परिमाणे शौचालयानां निर्माणेन स्वच्छता-क्रान्तिः सञ्जाता, 'आयुष्मान्- भारतयोजनाद्वारा दीनानाम् अकिञ्चनानां च कृते पञ्चलक्ष-रूप्यकपर्यन्तं निःशुल्क- चिकित्साव्यवस्था कल्पिता। बिहारेऽपि प्रायः दशकोटि-नागरिकेभ्यः निःशुल्क- अन्नवितरणस्य सुदृढव्यवस्था प्रचलति। राज्यस्य आधारभूतसंरचनायाः विकासं प्रकाशयन् मुख्यमन्त्री अवदत् यत् बिहारेऽपि विकासाय नूत्ना गतिः सम्प्राप्ता। पूर्वम् अस्मिन् राज्ये केवलम् अष्टसहस्र-किलोमीटर-मिताः मार्गाः आसन्, ये सम्प्रति प्रायः सार्धैकलक्ष-किलोमीटर-मिताः विवृद्धाः। आधुनिक-'द्रुतमार्गाणां' निर्माणेन सह अनेकाः महत्यः मार्गपरियोजनाः प्रगतिपथे सन्ति। सम्प्रति जलप्लावनस्य विभीषिकां चर्चयन् सः अकथयत् यत् अस्मिन् वर्षे सोन- गण्डक- गङ्गाप्रभृतिषु नदीषु जलस्तरः उच्चतमः अभवत्। सर्वकारः निरन्तरं जलप्लावन-पीडितानां साहाय्यार्थं कटिबद्धोऽस्ति; वायुसेनायाः आकाशयानैः आपद्ग्रस्तेभ्यः शुष्कखाद्यसामग्रीणां वितरणं विधीयते। जलप्लावनसमस्यायाः शाश्वतं समाधातुं सर्वप्रथमं कोशिनद्याः प्रवाह-नियन्त्रणाय कार्यं भविष्यति, ततः परं गङ्गा- सोन- गण्डकनदीनां वैज्ञानिकप्रबन्धनं विधास्यते। सेचनक्षेत्रेऽपि विपुलं कार्यं जातम्, येन चतुश्चत्वारिंशल्लक्ष- हेक्टेयरमिता भूमिः सेचिता जाता। बिहारेण देशाय ज्ञानस्य विज्ञानस्य च स्वर्णकालः समर्पितः, तस्यैव गौरवस्य पुनर्प्राप्तिः अस्माकं दृढसङ्कल्पः।शिक्षायाः कृषिक्षेत्रस्य च सुदृढीकरणाय सः न्यवेदयत् यत् राज्ये सप्तशतं 'सरस्वती- विद्या- निकेतनानि' निर्मितानि। सार्धत्रिलक्ष-छात्रेभ्यः रात्रावपि अन्तर्जालमाध्यमेन अध्यापकानां मार्गदर्शनं सुलभं कृतम्। जुलाई- मासस्य १५ दिनाङ्के एकदैव एकादशाधिकद्विशतं, पदवी- महाविद्यालयाः उद्घाटिताः, येषु सार्धद्विसहस्र- सहायकाचार्याणां नियुक्तिप्रक्रिया प्रचलति। कृषकाणां सुविधां विवर्धयितुं सर्वेषां विद्युत- प्रदायकानां सौरीकरणं भविष्यति, येन कृषिकार्याय सुलभा निरवच्छिन्ना च विद्युत् प्राप्स्यते।

सम्बोधनस्य प्रधाने भागे मुख्यमन्त्रिणा राजनैतिक- सिद्धान्तं स्पष्टीकुर्वता उक्तम्- "लोकतन्त्रे प्रजा एव सर्वोपरि, सैव स्वामिनी। इदं लोकतन्त्रं, न तु राजतन्त्रम्। प्रधानमंत्रिणा नरेन्द्रमोदिना निष्ठापूर्वकं जनसेवा विहिता, अत एव जनता तस्मै वारं वारम् अवसरं ददाति। जनतैव निश्चिनोति यत् कः प्रशासकीय- आसन्दिकायाम् उपवेक्ष्यति। यः धरातले कार्यं विधास्यति, स एव जनसमर्थनेन निर्वाचने विजयी भविष्यति। बिहारे सम्प्रति सुशासनस्य राज्यम् अस्ति, यत्र सामान्यजनानां त्वरितन्यायाय प्रशासनं जागरूकम् अस्ति। कापि अपराधिकी दुर्घटना घटेत चेत्, चतुर्विंशतिहोराभ्यन्तरे कठोरदण्डात्मिका कार्रवाई सुनिश्चिता क्रियते।" अन्ते सः अवदत् यत् महात्मनः गान्धिनः लालबहादुरशास्त्रिणश्च पावनस्मरणे राष्ट्रस्य सेवा, समर्पणं विकासयात्रा च संस्मर्यते, यस्यां नरेन्द्रमोदिनः विगतानां पञ्चविंशतिवर्षाणां कार्यजातं देशाय दिग्दर्शकम् अस्ति। अस्मिन् कार्यक्रमे कृषिमन्त्री विजयकुमार सिन्हा, सहकारितामन्त्री रामकृपालयादवः, कला- संस्कृतिमन्त्री प्रमोदकुमारः, मार्गनिर्माणमन्त्री कुमारशैलेन्द्रः, विधानसभासदस्यौ संजीवचौरसिया, सञ्जयगुप्तः, पाटलिपुत्रस्य महापौर-पदस्था (मेयर) सीतासाहू, मुख्यमन्त्रिणः सचिवः सञ्जयकुमारसिंहः, कलासंस्कृतिसचिवः प्रणवकुमारः, मण्डलाधिकारी कुन्दनकुमारः, वरिष्ठ- आरक्षी- अधीक्षकः कार्तिकेय के. शर्मा, बहवः जनप्रतिनिधयः उच्चाधिकारिणश्च समुपस्थिताः आसन्।

# विदेशयात्रातः प्रत्यागमनानन्तरमेव गयाक्षेत्रं सम्प्राप्तः विधानसभाध्यक्षः- डॉ. प्रेमकुमारः



## पितृपक्षमहामेलायाः व्यवस्थानां समीक्षणं कृतवान् अध्यक्षः, सेवाशिबिराणां च विहितं निरीक्षणम्

**हिमसंस्कृतवार्ताः- राघवनाथ झा, गया**

विदेशयात्रातः स्वदेशं प्रत्यागमनानन्तरमेव बिहार- विधानसभायाः अध्यक्षः डॉ. प्रेमकुमारः शुक्रवासरे गयाक्षेत्रं सम्प्राप्तवान्। सः पितृपक्षमहामेलायाम् आगतानां तीर्थयात्रिणां सौकर्याय स्थिरीकृतानां विविधानां सेवाशिबिराणां प्रत्यक्षं निरीक्षणं विहितवान्, तत्रत्यानां व्यवस्थानां च विस्तृत- समीक्षणं कृतवान्।

सर्वप्रथमं डॉ. प्रेमकुमारः 'सेवार्थ- फाउण्डेशन' संस्थायाः सेवाशिबिरं प्राविशत्। अस्मिन् शिबिरे भक्तजनेभ्यः प्राथमिक-चिकित्सा, शुद्ध-पेयजलम् अपराश्च अत्यावश्यकाः सुविधाः प्रदीयमानाः सन्ति। अस्मिन् अवसरे सः संस्थायाः सचिवाय उपेन्द्रकुमारयादवाय सेवाकार्याणां व्यवस्थानां च विषये पृष्टवान्, विस्तरेण च विमर्शं कृतवान्।

तदनन्तरं विधानसभाध्यक्षः 'मगध- शाक- प्रसंस्करण एवं वितरण-सहभागी-संस्थायाः' प्रदर्शिन्याः निरीक्षणं चकार। संस्थायाः अध्यक्षेण पप्पू चन्द्रवंशीमहोदयेन तीर्थयात्रिभ्यः शिबिरमाध्यमेन दीयमानानां सेवानां विवरणं तस्मै समर्पितम्।

विधानसभाध्यक्षेण 'सुकन्या- वेलफेयर- एसोसिएशन', 'आर्किटेक्ट एण्ड इंजीनियर- एसोसिएशन, गया' इत्यनयोः संस्थानां सेवाशिबिराण्यपि गत्वा अवलोकितानि। श्रद्धालुजनानां सौकर्यार्थं विविधाभिः सामाजिकसंस्थाभिः क्रियमाणानां निष्काम- सेवाकार्याणां सः भूरिशः प्रशंसां कृतवान्। अस्मिन् अवसरे डॉ. प्रेमकुमारः न्यवेदयत् यत् पितृपक्षमहामेलायां देशविदेशेभ्यः विपुलसंख्याकाः श्रद्धालवः गयाक्षेत्रम् आयान्ति। एतादृशे प्रसङ्गे सामाजिकसंस्थाभिः संस्थापितानि सेवाशिबिराणि तीर्थयात्रिभ्यः चिकित्सायाः, पेयजस्य अन्यासाम् आवश्यकसुविधानां च कल्पने महत्त्वपूर्णां भूमिकां निर्वहन्ति।

सः अग्रे अवदत् यत् भक्तजनानां सेवायै सौविध्याय च सामाजिकसंस्थानां सक्रियः सहभागः गयाधाम्नः सेवापरम्परां सुदृढां विधत्ते। पितृपक्षे अत्र आगच्छन्तः श्रद्धालवः धार्मिक्या श्रद्धया सह सेवा- सहयोगयोः अनुभूतिमपि सम्प्राप्य स्वगृहं प्रतिनिवर्तन्ते।

# बिहारम् उद्योगकौशलकेन्द्ररूपेण विकसितुं शासनस्य महती योजना, चकाई-क्षेत्रे ३४०० कोटिरूप्यकाणां पूँजीनिवेशः

## एथेनॉल- संयन्त्रेण प्रतिदिनं भविष्यति दश- लक्ष- लीटरमितस्य इन्धनस्य उत्पादनम्; नवसहस्र- एकड़- परिमितभूमौ औद्योगिक- क्षेत्रस्य सज्जीकरणम्




हिमसंस्कृतवार्ताः- राघव नाथ झा, पटना
बिहारराज्यम् उद्योगस्य कौशलविकासस्य च प्रमुखकेन्द्ररूपेण संस्थापयितुं राज्यसर्वकारेण औद्योगिक- प्रगतये स्वप्रयासाः तीव्रीकृताः। मुख्यमन्त्री सम्राटचौधरी शनिवासरे जमुई-जनपदस्य चकाईक्षेत्रे निर्माणाधीनस्य 'अङ्कुर-बायोकेम- प्राइवेट- लिमिटेड' संस्थायाः एथेनॉल-संयन्त्रस्य स्थलीयनिरीक्षणं विहितवान्। अधिकारिभिः सूचितं यत् २०२७ तमस्य वर्षस्य मार्च-मासपर्यन्तम् अस्मिन् संयन्त्रे उत्पादन-प्रक्रिया प्रारभ्येत। संयन्त्रपरिसरे मुख्यमन्त्रिणः अध्यक्षतायाम् आयोजितायां समीक्षागोष्ठ्यां विज्ञापितं यत् जमुईमण्डले अङ्कुरस्टील, अङ्कुर-बायोकेम, सीएलएम-डेवलपर्स, अङ्कुर-ट्रेडविस्टा- प्राइवेट- लिमिटेड- प्रभृतिभिः संस्थाभिः प्रायः चतुस्त्रिंशच्छतकोटि-रूप्यकाणां (३४०० कोटिरूप्यकाणाम्) पूँजीनिवेशः प्रस्तावितः। एताभिः परियोजनाभिः दशसहस्राधिकेभ्यः जनेभ्यः प्रत्यक्षाः अप्रत्यक्षाश्च वृत्तयः (रोजगार-अवसराः) लप्स्यन्ते।

### प्रतिदिनं दश-लक्ष-लीटर-परिमितम् एथेनॉल- उत्पादनम्

अधिकारिणां विवरणानुसारं पञ्चाधिक-शत-एकड़ परिमितायां भूमौ अस्य संयन्त्रस्य निर्माणं प्रचलति। अस्य उत्पादनक्षमता प्रतिदिनं सहस्र- किलोलीटर मिता भविष्यति, येन दिने दिने प्रायः दश-लक्ष-लीटर-परिमितम् एथेनॉल-इन्धनम् उत्पादयिष्यते। अत्र विंशतिमेगावाट परिमितायाः 'कैप्टिव- विद्युत्-उत्पादन-संविधायाः' अपि संस्थापनं क्रियते। अस्य संयन्त्रस्य सञ्चालनाय प्रतिदिनं त्रिंशत्सहस्र-क्विंटल- मितस्य धान्यस्य आवश्यकता भविष्यति, येन स्थानीय-कृषकाणां कृते तेषाम् उत्पादानां नियमितविपणनस्य सुयोगः समुपलब्धो भविष्यति। जलसंरक्षणाय पर्यावरणसुरक्षायै च अस्मिन् संयन्त्रे 'शून्य-द्रव-विसर्जन-प्रणाली' अङ्गीक्रियते।

### चकाई-क्षेत्रे नवसहस्र-एकर-भूमौ औद्योगिक- क्षेत्रस्य योजना

चकाई-क्षेत्रे प्रस्तावित्ताय औद्योगिक-क्षेत्राय प्रायः नवसहस्र-एकड़-मिता भूमिः अङ्किता कृता। अस्यां प्रायः पञ्चसहस्र-एकर-मिता भूमिः वनविभागस्य, चत्वारिसहस्र- एकड़मिता भूमिः रैयती- अन्यान्य-श्रेणीनां च वर्तते।

मुख्यमन्त्रिणा अधिकारिणः समादिष्टाः यत् दश-द्वादश- दिनाभ्यन्तरे अस्याः भूमेः मानचित्रणं विधातव्यम्। वनभूमेः वास्तविक-क्षेत्रफलस्य तत्रस्थ- वनस्थितेश्च स्पष्टा समीक्षा कर्तव्या। रैयतीभूमेः विस्तृतं सर्वेक्षणं कारयितुम् अपि निदेशः दत्तः। ३० अक्तूबर-दिनाङ्कं यावत् अस्याः समग्रं विवरणं संसज्य अग्रे कार्यारम्भः करणीयः; एतदर्थम् अञ्चलाधिकारिणः, डीसीएलआर-अधिकारिणः, राजस्व-भूमिसुधार-विभागस्य च सहयोगः गृह्यताम्।

### लछुआर-मन्दिरं गरही-जलाशयश्च पर्यटनकेन्द्ररूपेण विकसिष्येते

मुख्यमन्त्री लछुआर-मन्दिरं गरही-जलाशयं च पर्यटनदृष्ट्या समुन्नेतुं समादिष्टवान्। लछुआर-मन्दिरे जनसुविधानां विस्तारार्थं भक्तजनानां निवासव्यवस्थायाः च कृते कार्ययोजना निर्मीयताम्। पर्यटनेन स्थानीयस्तरे जीविकोपार्जनस्य सुयोगाः वर्धिष्यन्ते।

### विधि-व्यवस्थायाः मार्ग-संरचनायाश्च समीक्षा

जनपदे आरक्षी-व्यवस्थायाः सुदृढीकरणाय नियमित-निरीक्षण-प्रक्रियायै च निदेशाः दत्ताः। मण्डलाधिकारी आरक्षी-अधीक्षकश्च आरक्षालय-कार्यप्रणालीं समीक्षेताम्। नशामुक्ति-अभियानं द्रुततरं विधातव्यम्। भीमबान्ध-लक्ष्मीपुरं, मुङ्गेर-गंगटा- मार्गयोः सतत-निरीक्षणं संधारणं च विधातव्यम्। जनपदे 'रज्जुमार्गस्य' आवश्यकताम् अवधार्य प्रस्तावः प्रेष्यतां वनक्षेत्रेषु विद्युत-उपलब्धता विवर्ध्यताम्।

मुख्यमन्त्रिणा उद्घोषितं यत् बिहारम् औद्योगिकीकरणेन सह कौशलस्य केन्द्ररूपेण रूपान्तरयितुं सर्वकारस्य प्राथमिकता वर्तते। बिहारं जगन्मानचित्रे समुन्नत-स्थानं प्रापयितुं वयं सततं यतामहे। तत्पूर्वं सः पाटलिपुत्रात् चकाई-गमनवेलायाम् आकाशमार्गेण अङ्कितायाः भूमेः समवलोकनम् अकरोत्।

अस्यां गोष्ठ्यां उद्योगक्रीडामन्त्री श्रेयसी सिंहः, परिवहनमन्त्री दामोदररावतः, विधानसभ्या सावित्री देवी, विधानपरिषदः सदस्यः विजयकुमारसिंहः, पूर्वविधायकः सुमितकुमारसिंहः, मुख्यसचिवः प्रत्यय- अमृतः, आरक्षी-महानिदेशिका प्रीता वर्मा, पर्यावरण- वन- जलवायुपरिवर्तन- विभागस्य अपर- मुख्यसचिवः आनन्दकिशोरः, उद्योगसचिवः कुन्दनकुमारः, मुख्यमन्त्रिणः सचिवः सञ्जयकुमार सिंहः, राजस्व-भूमिसुधारसचिवः जयसिंहः, मुङ्गेर-मण्डलायुक्तः प्रेमसिंहमीणा, आरक्षी-उपमहानिरीक्षकः राकेशकुमारः, जमुई-मण्डलाधिकारी नवीनः, बांका-मण्डलाधिकारी अंशुल अग्रवालः, उद्योगनिदेशकः मुकुलकुमार गुप्तः, जमुई-आरक्षी-अधीक्षकः विश्वजीतदयालः अन्याश्च उच्चाधिकारिणः उपस्थिताः आसन्।

तथैव 'अङ्कुर- बायोकेम- प्राइवेट- लिमिटेड'-संस्थायाः मुख्यप्रबन्धक-निदेशकः महेन्द्रशर्मा, निदेशकः विशालशर्मा अन्याश्च उद्योग-प्रतिनिधयः उपस्थिताः आसन्।

# वार्ता-संवादः

हिमसंस्कृतवार्ताः, ईदरधीरजः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अद्य काः विचित्राः वार्ताः त्वया आनीताः?

**नन्दिनी-** सिंहपुरे एकेन जनेन कृत्रिममेधया एकस्य विशालस्य मकरस्य चित्रं रचितम्। तच्चित्रं सर्वत्र प्रेषितम्। तत् दृष्ट्वा सर्वैः भयम् अनुभूतम्। अन्ते आरक्षकैः सः धूर्तः धृतः।

**काव्या-** अहो! तेन महान् अपराधः कृतः। अन्या वार्ता अपि कृत्रिममेधा-विषये एव अस्ति। एकेन वृद्धेन यदा यदा कृत्रिममेधया सह सम्भाषणं कृतम्, तदा तदा तेन "महोदय" इति शब्दः प्रयुक्तः। अन्ते च तेन "धन्यवादः" इति उक्तम्। एतत् श्रुत्वा सर्वैः जनैः बहु हसितम्।

**नन्दिनी-** सत्यम्! तेन वृद्धेन अतीव मधुरः व्यवहारः दर्शितः। अन्या वार्ता शृणु। नेपोलियन-भूपस्य द्विशत- वर्षप्राचीनः गुप्तसन्देशः भूतः। सः सन्देशः कैश्चित् अपि न अवगतः। परन्तु अद्य सः कृत्रिममेधया षट्-होरासु एव पठितः प्रकाशितः च।

**काव्या-** आश्चर्यम्! कृत्रिममेधया महत् कार्यं साधितम्। अन्तिमा वार्ता वैज्ञानिकानाम् अस्ति। वैज्ञानिकैः नूतनम् एकं तथ्यं ज्ञातम्। मानवाः स्वभावात् एव अजानन्तः वाम-दिशि चलन्ति इति तैः दृष्टम्। अस्य कारणम् अद्यापि न स्पष्टीकृतम्।

**नन्दिनी-** विचित्रं खलु मानवानां शरीरम्। अद्यत्वे एताः एव वार्ताः। पुनर्दर्शनाय।



# महाविद्यालयेषु संस्कृतप्रचाराय

## अभ्यासवर्गस्य समापनम्



**हिमसंस्कृतवार्ताः- प्रयागराजः, उत्तरप्रदेशः**

संस्कृतभारत्याः पूर्वोत्तरप्रदेशक्षेत्रस्य तत्त्वावधाने श्रीसच्चाबाबाआश्रमस्य अरैल-सङ्गमतटे, प्रयागराजे अक्तूबरमासस्य १ दिनाङ्कतः ३ दिनाङ्कपर्यन्तम् आयोजितस्य महाविद्यालय-कार्याभ्यासवर्गस्य समापनसत्रं ३ अक्तूबरदिनाङ्के सम्पन्नम्। वर्गे पूर्वीउत्तरप्रदेशस्य विभिन्नेभ्यः जनपदेभ्यः आगताः चतुर्भ्यः प्रान्तेभ्यः २८ कार्यकर्तारः सहभागित्वं कृतवन्तः। उद्घाटनसत्रस्य शुभारम्भः क्षेत्रसङ्गठनमन्त्री प्रमोदपण्डितमहोदयेन, काशीसहप्रान्तमन्त्री डॉ. शालिग्रामत्रिपाठी-महोदयेन दीपप्रज्वालनेन कृतः। कार्यक्रमे महन्तः चन्द्रदेवमिश्रमहोदयः स्वकीयैः आशीर्वचनैः उपस्थितान् कार्यकर्तॄन् अनुगृहीतवान्। स्वकीयसम्बोधने महन्तः चन्द्रदेवमिश्रमहोदयः संस्कृतस्य व्यवहारिक-प्रयोगस्य महत्त्वं प्रतिपादयन् अवदत्- “संस्कृतादेव संस्कृतेन, किन्तु केचन संस्कृतार्थं न कुर्वन्ति। संस्कृतार्थं जीवन्तु। भारतस्य प्रतिष्ठायै द्वे संस्कृतं संस्कृतिश्च।” इति। तेन संस्कृतस्य केवलमध्ययनं न, अपि तु संस्कृतभाषायाः कृते जीवनसमर्पणस्य आवश्यकता अपि प्रतिपादिता। क्षेत्रसङ्गठनमन्त्री प्रमोदपण्डितमहोदयः अभ्यासवर्गस्य विभिन्नेषु सत्रेषु कार्यकर्तॄणां मार्गदर्शनं कुर्वन् महाविद्यालयेषु, यूनां मध्ये संस्कृतकार्यस्य विस्तारविषये चर्चां कृतवान्। महाविद्यालयेषु युवानः कथं संस्कृतं पठेयुः, संस्कृतेतरयुवानां समीपं संस्कृतं कथं नीयेत, युवानां मध्ये संस्कृतस्य प्रति रुचिः कथं जागरिता भवेत् इत्यादिषु विषयेषु विस्तृतं मार्गदर्शनं प्रदत्तम्। काशीसहप्रान्तमन्त्री डॉ. शालिग्रामत्रिपाठीमहोदयेन अपि महाविद्यालयेषु संस्कृतकार्यस्य प्रभावीक्रियान्वयनाय कार्यकर्तॄणां दायित्वं तथा कार्यविस्तारस्य विविधाः पक्षाः स्पष्टतया प्रतिपादिताः। वर्गे अखिलभारतीयसङ्गठनमन्त्री जयप्रकाशगौतम-महोदयः अपि उपस्थितः आसीत्। तेन कार्यकर्तॄणां मार्गदर्शनं कृत्वा महाविद्यालयेषु संस्कृतप्रचारस्य प्रभावीकार्ययोजनां प्रति विचारविमर्शः कृतः। त्रिदिवसीयेऽस्मिन् अभ्यासवर्गे महाविद्यालयेषु संस्कृतप्रचारः, युवानां संस्कृताध्ययनम्, संस्कृतेतरयुवानां मध्ये संस्कृतस्य प्रसारः, महाविद्यालयेषु संस्कृतगतिविधीनां विस्तारः इत्यादयः विषयाः प्रमुखतया चर्चिताः। विभिन्नजनपदेभ्यः समागतैः कार्यकर्तृभिः वर्गे सक्रियतया सहभागित्वं कृत्वा संस्कृतकार्य-विस्ताराय नूतनः उत्साहः संकल्पश्च स्वीकृतः। ३ अक्तूबरदिनाङ्के सम्पन्नेन समापनसत्रेण त्रिदिवसीयस्य महाविद्यालयकार्याभ्यासवर्गस्य औपचारिकं समापनम् अभवत्। समापनावसरे उपस्थितैः सर्वैः कार्यकर्तृभिः महाविद्यालयेषु संस्कृतस्य प्रचार-प्रसाराय निरन्तरं प्रयत्नं कर्तुं, युवानां मध्ये च संस्कृतस्य प्रति अनुरागं वर्धयितुं संकल्पः कृतः।

# डी. ए. वी. महाविद्यालये, कानपुरनगरे संस्कृतविभागेन आयोजितायाः "दशदिवसीय- संस्कृत- सम्भाषण- कार्यशालायाः" तृतीयदिवसस्य प्रतिवेदनम्



**हिमसंस्कृतवार्ताः- प्रांजल, कानपुरम्**

डी.ए.वी. महाविद्यालये, कानपुरे संस्कृतविभागेन आयोजितायाः "दशदिवसीय- संस्कृत- सम्भाषण- कार्यशालायाः" तृतीये दिवसे केन्द्रीय-संस्कृत- विश्वविद्यालयस्य (नवदिल्ली) प्रशिक्षकः सागरचौधरीमहोदयः "संस्कृतं विज्ञानं च शोधस्य अवसराः" इति विषये संगणकीय-प्रक्षेपणमाध्यमेन अत्यन्तं रोचकतया प्रस्तुतिं कृतवान्। सः नासदीयसूक्तस्य हिरण्यगर्भसूक्तस्य च दार्शनिकं वैज्ञानिकं च महत्त्वं प्रतिपाद्य नीतिशतक- हितोपदेशादीनां ग्रन्थानां माध्यमेन सदाचारस्य नैतिकशिक्षायाः च चर्चां कुर्वन् महाभारतस्य विविधप्रसङ्गानां दृष्टान्तैः सह आधुनिकीं 'टेस्टट्यूब बेबी' इत्याद्यां प्रणालियों विषये अपि प्रकाशं पातितवान्। सः माहेश्वरसूत्राणां वैज्ञानिकदृष्टिकोणस्य व्यापकतां सिद्धवान्, आचार्यपिङ्गलस्य छन्दशास्त्रमपि च चर्चयामाकारयत्। वैदिकमन्त्रैः रोगाणां निवारणं कथं भवति, साम्प्रतं प्रचलत्सु शोधकार्येषु अस्य कः प्रमाणिकः आधारः अस्ति, तदपि सोदाहरणं प्रदर्शितावान्। महामृत्युञ्जयमन्त्रस्य शाश्वत-सनातनास्तित्वस्य व्याख्यां कुर्वन् सः तस्य मन्त्रस्य घनपाठमपि श्रावितवान्। इयं संस्कृत-सम्भाषण- कार्यशाला आभासीमाध्यमेन सञ्चाल्यमानास्ति। अस्मिन् व्याख्याने प्रायः पञ्चनवतिः जनाः उपस्थिताः आसन्। अस्य व्याख्यानसत्रस्य मुख्यातिथिरूपेण महाविद्यालयस्य प्राध्यापकः प्राचार्यश्च प्रो. मनोजजौहरी आसीत्। अध्यक्षता संस्कृतविभागस्य विभागाध्यक्षः प्रो. विनोदकुमारपाण्डेयः अकृत, अपि च कार्यशालायाः सञ्चालनं संयोजकः डॉ. सवितुरप्रकाशगङ्गवारः अकरोत्।

**रविः खरिडेहालः - बेङ्गलूरु।**

# "ए-एल-टी-ई-एन्-भारत, अभियांत्रिकी संस्थानस्य वृद्धि कथा।"

फ्रान्स्-देशस्य ए-एल-टी-ई-एन् समूहस्य (ALTEN Group) ए-एल-टी-ई-एन्-भारत-संस्थायाम् अभियांत्रिकी कार्याणि प्रवर्तन्ते। सम्प्रति ५५०० जनाः कार्यरताः सन्ति, २०३० तमे वर्षे १५००० जनाः यावत् वर्धन्ते इति अपेक्षा अस्ति ।
निवेशस्य वर्धनेन सह भारतात् वितरितुं अभियांत्रिकीकार्यस्य व्याप्तेः विस्तारेण च कार्यबलस्य आवश्यकता सङ्गतम् अस्ति।
अभियांत्रिकीसंस्था शुद्धवितरण-नेतृत्वेन प्रतिरूपात् तत्र गच्छति यत्र भारते ६० तः ७० प्रतिशताधिकं कार्यं परिकल्पितं निर्मितं च भवति। संस्थायां अभियंताः विशेषज्ञाः च सन्ति । विशेषज्ञाः परिकल्पनायाः, रचनायाः, परीक्षणस्य, निष्पादनस्य, वितरणस्य च प्रबन्धनं कार्यान्वयनञ्च कुर्वन्ति । व्ययः एकः कारकः अस्ति किन्तु अन्ये कारकाः अपि भारतस्य विकासकथायाः योगदानं दत्तवन्तः। एते कारकाः सन्ति मापनीयता, गतिः, स्फूर्तिः, प्रतिभा, गुणवत्ता च ।

# महात्मागान्धीजयन्त्याः अवसरे 'माय सिटी, माय रन' कार्यक्रमान्तर्गतं मार्गधावन- प्रतियोगितायाः आयोजनम्




**हिमसंस्कृतवार्ताः- डॉ. विमलेश झा, भागलपुरम्।** डीएवी. राष्ट्रियक्रीडायाः, गान्धीजयन्त्याः तत्त्वावधाने बिहारराज्यस्य डीएवी पब्लिक स्कूल बरारी भागलपुरविद्यालयेन 'माय सिटी, माय रन' इति कार्यक्रमस्य आयोजनं कृतम्। कार्यक्रमस्य अन्तर्गतं मार्गधावनप्रतियोगितायाः आयोजनं जातम्। अस्यां प्रतियोगितायां विद्यालयस्य प्रायः शतं बालक-बालिकाश्च उत्साहपूर्वकं भागं गृहीतवन्तः। धावनप्रतियोगितायाः शुभारम्भः भागलपुरनगरस्य केन्द्रीयकारागारस्य मुख्यद्वारात् अभवत्। प्रतिभागिनः तस्मात् स्थानात् धावित्वा जीरोमाइल्,भागलपुरम् इति स्थानपर्यन्तं गतवन्तः। सर्वे प्रतिभागिनः प्रातःषड्वादने एव प्रतियोगितास्थले प्राप्तवन्तः। विद्यालयस्य प्रधानाचार्यः सह सहायकक्षेत्रीय अधिकारी अनिलकुमारमहोदयः हरितध्वजं प्रदर्श्य धावनप्रतियोगितायाः शुभारम्भं कृतवान्। अस्मिन् अवसरे सः अवदत्- "एतादृशैः आयोजनैः छात्रेषु शारीरिकसक्रियता, अनुशासनभावना, स्वस्थजीवनशैलीं प्रति जागरूकता वर्धते। अद्यतनस्य धावमानजीवनस्य मध्ये स्वस्थजीवनं धारयितुं महती दुष्करता वर्तते। स्वस्थे शरीरे एव स्वस्थस्य मस्तिष्कस्य विकासः भवति। अतः एतादृशानि आयोजनानि स्वस्थभारतस्य संकल्पनां साकारयितुं महत्त्वपूर्णानि साधनानि भवन्ति।" द्विकिलोमीटर- धावनप्रतियोगितायां बालिकावर्गे नवमकक्षायाः साक्षीकुमारी, सपनाकुमारी, साक्षीकुमारी इत्येताभिः क्रमशः प्रथमं, द्वितीयं, तृतीयं स्थानं च प्राप्तम्। बालकवर्गे यत्र दशमकक्षायाः आयुषकुमारः, प्रियांशुराजः क्रमशः प्रथमं, द्वितीयस्थानं प्राप्तवन्तौ, तत्रैव एकादशकक्षायाः शाश्वतराजशाण्डिल्यः तृतीयस्थानं प्राप्तवान्। विद्यालयस्य प्रधानाचार्यः सह सहायकक्षेत्रीय अधिकारी अनिल-कुमारमहोदयः सर्वेभ्यः विजेतृभ्यः पुरस्कारान् अयच्छत्। प्रतियोगितायाः सफलायोजने प्रमोदकुमारमण्डलः, लवलीकुमारी, कौशल-कुमारः, देवाशीषभारती, आशुतोषकुमारः, डॉ. चन्द्रहासभारती, डॉ. विमलेशझा, सत्याझा, प्रगति-मिश्रा, सुजीतकुमारमण्डलः, अविनाशकुमारः, गौतमकुमारः, आनन्दशेखरः, गवेन्द्रनारायणसिंहः, नवेशभारती, सुमन्तकुमारशर्मा, योगेश झा, पीयूष आनन्दः, प्रेमनारायणकर्णः, राकेशकुमार श्रीवास्तवः, ललन कुमार झा इत्यादयः विद्यालयस्य शिक्षक- शिक्षिकाः शिक्षकेतरकर्मचारिणश्च सक्रियतया सहभागितां कृतवन्तः। अस्य आयोजनस्य माध्यमेन छात्राः नियमितव्यायामं, शारीरिकसक्रियतां, स्वस्थजीवनशैलीम् अङ्गीकर्तुं प्रेरिताः अभवन्




# विधानपरिषदनिर्वाचनात् प्राक् एकीकृत- जनतादले (जदयू-पक्षे) सञ्जाते कलहे शीर्षनेतृत्वस्य दृष्टिः, ललनसिंहस्य मध्यस्थतया समाधानस्य यत्नः

**हिमसंस्कृतवार्ताः- राघवनाथ झा, पटना**

बिहारराज्ये अष्टानां स्थानानां कृते आयोज्यमानं विधानपरिषद- निर्वाचनम् अधिकृत्य राजनैतिक-गतिविधयः अतीव तीव्राः सञ्जाताः। अस्मिन्नेव काले सत्तारूढस्य एकीकृत-जनता-दलस्य (जनता दल यूनाइटेड) आन्तरिक-कलहः प्रकाशम् आयातः, यत्र मोकामा-क्षेत्रस्य पूर्व- विधानसभा- सदस्यस्य अनन्तसिंहस्य, एकीकृत- जनता- दल- प्रत्याशिनः नीरजकुमारस्य च परस्पर-विवादं दृष्टिगत्य दले महत् सङ्क्षोभः उत्पन्नः। अस्य कलहस्य शमनाय सम्प्रति दलीयस्तरे गम्भीरा विचारविमर्श-परम्परा प्रक्रमते। बिहार-सर्वकारस्य मन्त्रिणा श्रवणकुमारेण निगदितं यत् विषयेऽस्मिन् दलस्य अन्तः सम्भाषणं प्रचलति, एकीकृत-जनता-दलस्य वरिष्ठनेता ललनसिंहः समग्रं विषयम् अनुसन्धाय सूक्ष्मतया समीक्षते। सः अवदत् यत् परस्पर-संवादे सम्पन्ने सति एव आगामिनी स्थितिः पूर्णतया स्पष्टा भविष्यति। अतः पूर्वम् एकीकृत-जनता-दलस्य कार्यवाहक-राष्ट्रिय- अध्यक्षेण सञ्जयझा- महोदयेनापि स्पष्टीकृतम् आसीत् यत् मुङ्गेर- संसदीयक्षेत्रस्य लोकसभासदस्यः ललनसिंहः अस्य सम्पूर्णस्य प्रकरणस्य प्रबन्धनं करिष्यति। तदनन्तरमेव दलस्य अन्तः जायमानासु गतिविधिषु राजनैतिक-वृत्तानां दृष्टिः निहिता अस्ति। इतोऽपि अनन्तसिंहः पाटलिपुत्रात् अन्यत्र प्रस्थितः। तस्य आगामिनं राजनैतिक-पदक्षेपम् अधिकृत्य विविधाः सम्भावनाः राजनैतिक-विद्भिः उपस्थाप्यन्ते; तथापि तस्य पक्षतः सम्प्रति कापि प्रामाणिकी उद्घोषणा न विहिता। मन्त्री श्रवणकुमारः अनन्तसिंह-नीरजकुमारयोः कलहं स्पष्टतया अङ्गीकुर्वन् अवदत् यत् संवादेन सौहार्दपूर्णं समाधानं प्राप्तुं निरन्तरं प्रयतते। सः एतदपि न्यवेदयत् यत् सम्प्रति दलकार्यकर्तृभिः परिणामं यावत् धैर्यम् अवलम्बनीयम्।
अष्टानां विधानपरिषदस्थानानां निर्वाचनं समुपस्थिते सति, एकीकृत-जनता-दलस्य अन्तः सञ्जाताम् एतां विसङ्गतिं सर्वे राजनैतिक-दलाः सूक्ष्मतया अवलोकयन्ति। अधुना वार्तायाः परिणत्या दलनेतृत्वस्य च आगामिना निर्णयेनैव समग्रस्य विषयस्य दिशा निर्णीता भविष्यति।

**हिमसंस्कृतवार्ताः, सत्येन्द्रपाठकः (लखनऊ)**

# भारत-भार्याः (भारतभारी)

## ऐतिहासिकं पौराणिकं च महत्त्वम्

उत्तरप्रदेशस्य सिद्धार्थनगरजनपदे डुमरियागञ्ज-विकासखण्डे स्थितं भारतभारी नामकं स्थानं ऐतिहासिक- पौराणिक-दृष्ट्या अत्यन्तं महत्त्वपूर्णं मन्यते। जनपदस्य मुख्यालयात् नौगढतः पश्चिमदिशि प्रायः पञ्चषष्टिः किलोमीटर-दूरे, डुमरियागञ्जनगरात् प्रायः पञ्च किलोमीटर-दूरे च भारतभारी स्थितम् अस्ति। राज्यस्य राजधानी लखनऊतः अस्य दूरी प्रायः द्विशताधिक-दश (२१०) किलोमीटर अस्ति।
भारत-भार्याः समीपे माधली, समदा, महुरा, औसानकुइयाँ, अजगरा च इत्यादीनि ग्रामाणि सन्ति। अस्य दक्षिणदिशि रामनगरविकासखण्डः, उत्तरदिशि खुनियांवविकासखण्डः, पूर्वदिशि मिठवलविकासखण्डः, समीपवर्ती भागे रुधौलीविकासखण्डः च स्थितः अस्ति। एतत् क्षेत्रं सिद्धार्थनगर- बस्तीजनपदयोः सीमाक्षेत्रे अपि स्थितम् अस्ति।

### प्राचीनं शिवमन्दिरं विशालश्च जलाशयः

भारतभार्यां प्राचीनं शिवमन्दिरम् अस्ति। मन्दिरस्य सम्मुखे प्रायः षोडशबीघापरिमितः विशालः जलाशयः वर्तते। स्थानीयपरम्परानुसारं अयं जलाशयः धार्मिकदृष्ट्या अत्यन्तं पवित्रः मन्यते। जलाशयस्य तटे हनुमतः, रामजानकीदेव्याः तथा दुर्गादेव्याः मन्दिराणि अपि स्थितानि सन्ति। कार्तिकपूर्णिमायां भारत-भार्यां विशालः मेला आयोज्यते। अयं मेला प्रायः सप्ताहपर्यन्तं चलति तथा दूरदूरात् सहस्रशः श्रद्धालवः दर्शनार्थम् आगच्छन्ति। चैत्ररामनवम्यां महाशिवरात्रौ च अत्र धार्मिकमहोत्सवाः मेलाश्च आयोज्यन्ते।
ऐतिहासिकसन्दर्भेषु "United Provinces of Agra and Oudh" इत्यस्य वर्षे १९०७ तमस्य

प्रकाशनस्य तृतीयद्वात्रिंशद्भागे पृष्ठयोः ९६–९७ मध्ये भारत-भार्याः कार्तिकपूर्णिमामेलस्य उल्लेखः प्राप्यते। तत्र उल्लिखितानुसारं १८७५ तमे वर्षे आयोजिते कार्तिकपूर्णिमामेले प्रायः पञ्चाशत्सहस्रं जनाः सम्मिलिताः आसन्।

**भरतस्य राजधानी इति जनश्रुतिः**

भारत-भार्याः प्राचीनत्वसम्बन्धे विविधाः जनश्रुतयः प्रचलिताः सन्ति। एकस्यां जनश्रुतौ महाराजस्य दुष्यन्तस्य पुत्रः भरतः अत्र स्वराजधानीं स्थापितवान् इति कथ्यते। ततः अस्य स्थानस्य प्राचीनं नाम “भरतभारी” आसीत्, कालान्तरे तदेव “भारत-भारी” इति प्रसिद्धम् अभवत् इति स्थानीयपरम्परा अस्ति। अन्यस्यां पौराणिकजनश्रुतौ कथ्यते यत् पाण्डवानां अज्ञातवाससमये भगवान् श्रीकृष्णः आर्द्रवनप्रदेशमार्गेण गच्छन् भारत-भार्याः आगतवान्। तत्र स्थितं शिवमन्दिरं दृष्ट्वा सः तत्र अवस्थितवान्, समीपस्थे जलाशये स्नानं कृत्वा शिवस्य पूजाम् अकरोत् इति कथ्यते।

**हनुमतः सम्बन्धिता पौराणिकी कथा**

भारत-भार्याः हनुमता सह सम्बद्धा एका प्रसिद्धा जनश्रुतिरपि अस्ति। राम-रावणयोः युद्धकाले लक्ष्मणः मूर्छितः अभवत्। तदा हनुमान् संजीवनीबूटिकां नेतुं गच्छन् अत्रप्रदेशस्य उपरि आगतवान् इति कथ्यते।

जनश्रुत्यानुसारं महाराजः भरतः हनुमन्तं रामस्य शत्रुम् इति मत्वा तस्योपरि बाणं प्रहृतवान्। तेन प्रहारेण हनुमान् पर्वतसहितः अत्रैव पतितवान् इति कथ्यते। तस्मिन् स्थाने निर्मितः गर्तः पश्चात् जलाशयरूपेण परिणतः इति स्थानीयकथा प्रचलिता अस्ति। हनुमन्तं दृष्ट्वा भरतः स्वकृत्यस्य विषये पश्चात्तापं कृत्वा अत्र शिवमन्दिरस्य स्थापनां कारितवान् इत्यपि जनश्रुतिः अस्ति।

**पुरातात्त्विकदृष्ट्या महत्त्वपूर्णं स्थलम्**

भारत-भार्याः ऐतिहासिकमहत्त्वस्य विषये पुरावशेषाः अपि प्राप्ताः सन्ति। बनारस- हिन्दू-विश्वविद्यालयस्य प्राचीनइतिहास-पुरातत्त्वविशेषज्ञेन सतीशचन्द्रवर्येण भारत-भार्याः स्थलीयनिरीक्षणं कृतम् इति स्थानीयसन्दर्भेषु उल्लिखितम् अस्ति। तेन अत्र प्राप्तानां मूर्तीनां, धात्ववशेषाणाम्, अन्येषां च पुरावशेषाणाम् अवलोकनं कृतम् इति कथ्यते।

अत्र प्राचीनाः टीलाप्रदेशाः, कूपाः, भूमिगतावशेषाः दृश्यन्ते। स्थानीयवर्णनानुसारं भूमेः अधः प्राप्तेषु अवशेषेषु प्राचीननिर्माणानां भित्तयः तथा परस्परं सम्बद्धाः नालिकाः सन्ति। एताः नालिकाः अन्ते जलाशयेन सम्बद्धाः आसन् इति पुरातात्त्विक-वर्णनेषु कथ्यते। एते अवशेषाः प्राचीननगरस्य विकसितजलनिकासव्यवस्थायाः संकेतं ददतीति स्थानीयमतम् अस्ति। पुरातत्त्वसम्बद्धविभागेन भारतभारीस्थलं कुषाणकालीन ऐतिहासिक-स्थलरूपेण सूचीबद्धम् इति अपि उल्लेखः प्राप्यते।

**पर्यटनस्थलरूपेण विकासः**

ऐतिहासिक-पौराणिक-धार्मिक-महत्त्वेन समन्वितं भारत-भारीस्थानं वर्तमानकाले पर्यटनस्थलरूपेण विकसितुं प्रयत्नाः क्रियन्ते। प्राचीनशिवमन्दिरम्, विशालः जलाशयः, हनुमत्सम्बद्धा जनश्रुतिः, पुरातात्त्विकावशेषाः, वार्षिकाः धार्मिकमेलाः च अस्य स्थानस्य प्रमुखाः आकर्षणकेन्द्राः सन्ति।

अतः भारत-भारी केवलं धार्मिकश्रद्धायाः केन्द्रं न, अपि तु सिद्धार्थनगरजनपदस्य ऐतिहासिक-पौराणिक- पुरातात्त्विक- सांस्कृतिकसम्पदः महत्त्वपूर्णं केन्द्रम् अपि अस्ति।



## "संस्कृतकथामञ्जरी" {२६}

## ।।द्वात्रिंशत्पुत्तलिकासिंहासनम्।।

# "अथ योगिसन्दर्शनं नाम विंशोपाख्यानम्"

पुनरपि राजा यावत् सिंहासने समुपवेष्टम् उपक्रमते, तावदन्या पुत्तलिकाऽब्रवीत्- भो राजन्! यदि त्वयि विक्रमस्येव औदार्य्यादयः गुणाः सन्ति तदा सिंहासने समुपविश। राजा अवदत्- भो पुत्तलिके! कथय तस्य विक्रमास्योदार्य्यादीन् गुणान्।

पुत्तलिका अवदत्- श्रूयतां राजन्! विक्रमो राजा षणमासान् राज्यं करोति, षण्मासान् देशान्तरेषु भ्रमति। एकदा देशान्तरगतो नानादेशान् परिभ्रमन् पद्मालयं नाम नगरमगमत्। तत्र सुमनोहरे बहिरुद्यानि अतिविमलोदकं कश्चित् सरोवरं दृष्टा, तत्रोदकपानं कृत्वा उपविष्टः। ततोऽन्यतः अन्येऽपि केचन वैदेशिकाः समागत्य, जलपानं विधाय तत्र उपविष्टाः परस्परं गोष्ठीरकुर्वन्- अहो! अस्माभिरनेके देशाः दृष्टाः, बहुनि तीर्थस्थानानि पर्य्यटितानि, अतिदुर्गमाः कैरप्यनधिगम्याः, पर्वताश्च आरूढाः, परमकुत्रापि महापुरुषदर्शनं नाभूत् इति। तत्र एकेन भणितं- कथं महापुरुषदर्शनं भविष्यति? यत्र महासिद्धोऽस्ति तत्र गन्तुं न शक्यते, यतः तत्रत्यो मार्गोऽतिदुर्गमः मध्ये च अनेके विघ्नाः सम्भवन्ति, देहस्य नाशः सम्भाव्यते।

येनोद्यमेन प्रथममात्मविनाशशङ्का सञ्जायते,तस्य फलं को वा अनुभवितुमच्छति? यतः बुद्धिमता सर्वथा आत्मेव प्रथमं रक्षणीयः। उक्तञ्च-

**"पुनर्दाराः पुनर्वित्तं पुनः क्षेत्रं तथैव च।**
**पुनः शुभाशुभे कर्मे शरीरं न पुनः पुनः।।"**

अथ राजा तेषामेवं वचनं समाकर्ण्य भणति- अहो वैदेशिक! किमेवमुच्यते! यदा पुरुषेण पौरुषं साहसञ्च क्रियते, तदा तस्य किमपि कार्य्यं दुष्करं न भवति। एतत् राजवचनं श्रुत्वा तैः उक्तं- महासत्त्व! किं कार्य्यं तत् कथय। राज्ञोक्तम्- अस्मात् स्थानात् द्वादशयोजनपर्य्यन्तं यदि गम्यते तर्हि तत्र महारण्यमध्ये विषमः कश्चित् पर्वतोऽस्ति, तदुपरि त्रिकालनाथो नाम योगश्वरो विद्यते। यदि तस्य दर्शनं क्रियते तर्हि स सर्वं वाञ्छितमर्थं दास्यति, अहं तत्र गच्छामि। तैरुक्तं- वयमप्यागमिष्यामः।

राज्ञोक्तं- सुखेन आगच्छत। ततस्ते राज्ञा सह निर्गताः महारण्ये मार्गमतिविषमं दृष्ट्वा राजानं प्रोचुः- भो महासत्त्व! कियद्दूरे पर्वतोऽस्ति? राज्ञोक्तम्- इतः अष्टयोजनदूरे विद्यते। तैरुक्तं- यद्यपि महद्दूरमेतत्, मार्गोऽप्यतिविषमः, तथाऽपि वयं गमिष्यामः, इति ब्रुवन्तः, षड्योजनानि अतिक्रम्य पुरतो यावत गच्छन्ति, तावन्महाकालवदनः विषाग्निमुहमन् अतिभयङ्कर कश्चित सर्पो मार्गमावृत्य तिष्ठति, इति दृष्ट्वा ते सभयाः पलायञ्चक्रिरे। राजा तथापि मार्गे गन्तुं प्रवृत्तः। अथ सर्पः समागत्य राजानं वेष्टियित्वा समदशत्। ततः स विषवत् दष्टस्थानं वस्त्रखण्डेन बद्ध्वा, विषज्वालसमन्वितोऽपि ससर्पः दुर्गमं पर्वतमारुह्य त्रिकालनाथं योगिनं दृष्ट्वा नमस्कार। योगिसन्दर्शनमात्रेण स सर्पस्तं त्यक्त्वा गतः, राजाऽपि सत्वरं निर्विषो बभूव। ततो योगिनोक्तं- भो महासत्त्व! महाप्रमादभूयिष्ठम् एवममातुषं स्थानम् अतिकष्टेन किमर्थमागतोऽसि? राज्ञोक्तं- भो स्वामिन्! अहं तव सन्दर्शनार्थम् आगतोऽस्मि। योगिनोक्तं- महत् कष्टम् अनुभूतं खलु त्वया। राज्ञोक्तं- किमपि कष्टं नास्ति, भवत्सन्दर्शनमात्रेण सकलमपि पातकं गतम्। ईदृक् क्लेशं स्वीकृत्य अद्याहं धन्योऽस्मि यतो महान्तो हि अतीव दुर्लभदर्शनाः, सकृदपि तैः सङ्गतिः आत्मोन्नतिजननो, महताऽपि विकारहेतुना ते खलु नान्यथाप्रकृतयः। ततः प्रसन्नेन योगिना कठिनी, योगदण्डः, कन्था च दत्ता, उक्तञ्च- भो राजन्! अनया कठिन्या भूमौ यावत्यः रेखा लिख्यन्ते, तावन्ति योजनानि एकस्मिन् दिने गन्तुं शक्यन्ते, एष योगदण्डः दक्षिणहस्तेन स्पृश्यते यदि तर्हि मृतसैन्यं सज्जीव्य उत्तिष्ठति, वामहस्तेन स्पृश्यते यदि,तदा सर्वस्यापि विपक्षस्य सैन्यनाशो भवति, इयं कन्थाऽपि यच्छकाशे वर्तते, तस्मै ईप्सितवस्तुनि प्रयच्छति।

राज्ञाऽपि तत्रयं गृहीत्वा योगिनं नमस्कृत्य, अनुज्ञां लब्ध्वा यावत् गम्यते तावत् राजमार्गे कश्चिद्राजकुमारः सन्मुखे अग्निं संस्थाप्य काष्ठानि सञ्चिनोति इति अदृश्यत। ततः राजामतमपृच्छत्- भो सौम्य! किमेवं क्रियते? तेनोक्तम्- अहं कश्चिद्राजकुमारः, मम राज्यं दायादैरपहृतं, दरिद्रोऽहं जीवनं धारयितुमक्षमः सन् अग्नौ प्रविशं कर्त्तुं काष्ठानि सञ्चिनोमि। ततो राजा तस्मै अभयं दत्त्वा तां कठिनीं, योगदण्डं, कन्थाञ्च ददौ, तेषां गुणानपि अकथयत्। तदन्तरम् अतिसंतुष्टो राजकुमारो राजानं प्रणम्य स्वदेशमगमत्। विक्रमोऽपि उज्जयिनीमगात्।

इमां कथां कथयित्वा पुत्तलिका भोजराजमवदत्- भो राजन्! त्वयि यदि एवम् औदार्य्यादयो गुणा विद्यन्ते, तर्हि अस्मिन् सिंहासने समुपविश। राजा तूष्णीं स्थितः।

**डा. वर्षा प्रकाश टोणगांवकर ©®**
**पुणे, महाराष्ट्रम्**